"वन्दे मदनगोपालं कैशोराकारमद्भुतम् ।
यस्माद्दुर्व्विनोद्भिन्ने श्रीमन्मदनमोहनम् ॥"
इति पाद्मे पातालखण्डे ६ अध्यायः ॥

मदनशलाका, स्त्री, ( मदनोद्दीपिका शलाकेव । अस्याः कामोद्दीपकत्वात्तथात्वम् । ) कामोद्दीपकौषधम् । सारिकापक्षी । इति मेदिनी । के, २३५ । कोकिला । इति शब्दरत्नावली ॥

मदनसारिका, स्त्री, ( मदनोद्दीपनाय सारिका । ) पक्षिभेदः । सालिक् इति भाषा ॥ तत्पर्य्यायः । शलाका २ सारिका ३ चित्रलोचना ४ कुणपी ५ । इति जटाधरः ॥

मदना, स्त्री, ( मदयति मत्ततां जनयतीति । मद् + णिच् + ल्युः । यद्वा, माद्यति अनया । मद् + ल्युट् । स्त्रियां टाप् । ) सुरा । इति हेमचन्द्रः । ३ । ५६७ ॥

मदनाङ्कुशः, पुं, ( मदनस्य कामस्य अङ्कुश इव । ) लिङ्गम् । इति त्रिकाण्डशेषः ॥ नखम् । इति कामाङ्कुशशब्ददर्शनात् । यथा,—
"कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे ।"
इति श्रुतबोधे कालिदासः ॥

मदनाग्रकः, पुं, (मदनं उन्मादकं अग्रं शिरोभागो यस्य । ) कोद्रवः । इति राजनिर्घण्टः ॥ ( विवरणमस्य कोद्रवशब्दे ज्ञातव्यम् ॥ )

मदनायुधः, पुं, ( मदनस्यायुधः । ) भगम् । इति शब्दचन्द्रिका ॥

मदनायुषः, पुं, ( मदनस्यायुर्जीवनं इव समासान्तोऽच् । निपातनात् साधुः । ) कामवर्द्धकत्वात्तथात्वम् । कामवृद्धिक्षुपः । इति राजनिर्घण्टः ॥

मदनालयः, पुं, ( आलीयतेऽस्मिन्निति आ + ली + अधिकरणे अच् । मदनस्यालयः । ) षष्ठीसमासः ।) भगम् । मदनपर्य्यायकशब्दोत्तरगृहपर्य्यायकशब्देन भगस्योक्तत्वात् । यथा,—
"स्वपुष्पैराकीर्णे कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव
मनुम् ॥"
इति कर्पूरस्तवः ॥
लग्नावधिसप्तमस्थानम् । तत्तु जायास्थानम् । यथा,—
"तुर्य्यात्तुलान् क्रियवृषमृगस्त्रीकुलीरान्त्ययुक्ते
दिग्वह्नीन्द्रिद्वयतिथिशरान् सप्तविंशांश्च विंशान् ।
अंशानेतान् वदति यवनश्चान्त्यतुङ्गान् सतुङ्गान्
तानेवांशान् मदनभवनेष्वाह नीचान् सुनीचान् ॥"
इति दीपिकायां मदनभवनशब्ददर्शनात् ॥

मदनावस्था, स्त्री, ( मदनस्यावस्था । ) कामावस्था । सा तु उद्वेगरूपा । विरह इति यावत् । यथा । ततः प्रविशति मदनावस्थो राजा निःश्वस्य ।
"जाने तपसो वीर्य्यं सा बाला परवतीति मे विदितम् ।
न च निम्नादिव सलिलं निवर्त्तते मे ततो हृदयम् ॥"
इत्यभिज्ञानशकुन्तले ३ अङ्कः ॥ मदनावस्था इति राज्ञोऽत्र उद्वेगरूपा पञ्चमी कामावस्था । यदाह भरतः । उद्वेगः पञ्चमः प्रोक्त इति । सचिन्तमिति केनोपायेन मम शकुन्तलालाभो भविष्यति । इति तट्टीका ॥

मदनी, स्त्री, ( माद्यति अनया इति । मद् + करणे ल्युट् । स्त्रियां ङीप् । ) सुरा । इति हारावली ॥ कस्तूरी । अतिमुक्तकः । इति राजनिर्घण्टः ॥

मदनेच्छाफलः, पुं, ( मदनेच्छां फलति जनयतीति अच् । ) वहुरसालः । इति राजनिर्घण्टः ॥

मदनोत्सवः, पुं, ( मदनाय उत्सवः । ) उत्सवविशेषः । होलाका इति ख्याता । तत्पर्य्यायः । सुवसन्तकः २ । इति हारावली ॥

मदनोत्सवा, स्त्री, ( मदनाय उत्सवो यस्याः । ) स्वर्गवेश्या । इति शब्दरत्नावली ॥

मदप्रयोगः, पुं, ( मदस्य प्रयोगः । ) करिणां मदोद्गमः । तत्पर्य्यायः । प्रस्तारमूर् २ । इति त्रिकाण्डशेषः ॥

मदभञ्जिनी, स्त्री, ( मदं उन्मत्ततां भनक्ति दूरीकरोतीति । मद + भनज् + "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।" ३ । १ । १३४ । इति णिनिः । स्त्रियां ङीप् । ) शतमूली । इति शब्दचन्द्रिका ॥ ( गुणादयोऽस्याः शतमूलीशब्दे ज्ञातव्याः ॥ )

मदयन्तिका, स्त्री, ( मदयन्ती + तत: कन् टाप् । पूर्व्व ह्रस्वश्च ।) मल्लिका । इति शब्दरत्नावली ॥ ( यथा, सुश्रुते चिकित्सितस्थाने१८ अध्याये ।
"पिप्पलीत्वक् त्रिकटुका सुरसा मदयन्तिका ।
वायस्यारग्वधानाञ्च तुलां कुर्य्यात् पृथक्
पृथक् ॥" )

मदयन्ती, स्त्री, ( मद् + णिच् + शतृ + ङीप् । ) वनमल्लिका । इति रत्नमाला ॥ काट्मल्लिका इति भाषा ॥ मल्लिका । इतिराजनिर्घण्टः ॥ ( तथाचास्याः पर्य्यायो यथा,—
"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी ।"
इतिभावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"मदयन्त्यद्भिजः क्वाथस्तद्वत् समधुशर्करः ।"
इति च वैद्यकचक्रपाणिसंग्रहे रक्तपित्ताधिकारे ॥)

मदयित्नु, क्ली, ( मदयतीति । मद् + णिच् । "स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् ।"उणा० ३ । २९ । इति मदि + इत्नुच् । "अयामन्ताल्वाय्येत्न्विष्णुषु ।" ६ । ४ । ५५ । इति णेरयादेशः ।) मद्यम् ।इति मेदिनी । ने, २०२॥

मदयित्नुः, पुं, ( मदयतीति । मद् + णिच् । "स्तनीति ।" उणा० । ३ । २९ । इति इत्नुच् । णेरयादेशश्च । ) कामदेवः । शौण्डिकः । इति शब्दरत्नावली ॥ मद्युक्तः । इति मेदिनी । ने, २०२ ॥ मेघः । इति त्रिकाण्डशेषः ॥

मदविक्षिप्तः, पुं, ( मदेन विक्षिप्तश्चलितमनाः । ) मत्तहस्ती । इति शब्दचन्द्रिका ॥

मदशाकः, पुं, (मदकरः शाकोऽस्य ।) उपोदकी । इति राजनिर्घण्टः ॥

मदसारः, पुं, ( मदं सारयति दूरीकरोति । इति मद + सृ + णिच् + अण् । ) तूलवृक्षः । इति राजनिर्घण्टः ॥

मदहस्तिनी, स्त्री, ( मदेन हस्तिनीव । ) महाकरञ्जः । इति राजनिर्घण्टः ॥

मदहेतुः, पुं, ( मदस्य हेतुः कारणम् ।) धातकी । इति वैद्यकम् । मत्तताकारणञ्च । ( मदरोगस्य हेतुः यथा,—
"यदा तु रक्तवाहीनि रससंज्ञावहानि च ।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता
मलाः ॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः ।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा ॥
मदमूर्च्छाय संन्यासास्तेषां विद्याद्विचक्षणः ।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु ॥"
इति चरके सूत्रस्थाने चतुर्विंशेऽध्याये ॥ )

मदस्थलं, क्ली, ( मदस्य स्थलम् । ) मदस्थानम् । यथा, शब्दरत्नावली ।
"अवदंशः सुरापानं शुण्डापानं मदस्थलम् ।"

मदस्थानं, क्ली, (मदस्य स्थानम् ।) मद्यपानस्थानम् । तत्पर्य्यायः । शुण्डापानम् २ । इत्यमरः । २ । १० । ४१ ।

मदाढ्यः, पुं, ( मदेन मदजनकरसेन ताड्यैति ख्यातेन आढ्यः युक्तः । ) तालवृक्षः । इति राजनिर्घण्टः ॥ ( गुणादिविवरणमस्य तालशब्दे ज्ञातव्या ॥ ) मदयुक्ते, त्रि ॥

मदाढ्या, स्त्री, (मदेन आढ्या । ) लोहितझिण्टी । इति शब्दचन्द्रिका ॥

मदातङ्कः, पुं, ( मदजनितः आतङ्कः रोगः । ) मदात्ययरोगः । इति राजनिर्घण्टः ॥

मदात्ययः, पुं, ( मदेन अत्ययो नाशोऽस्मात्तस्य । ) मद्यपानादिजन्यरोगविशेषः । तत्पर्य्यायः । मदातङ्कः २ पानात्ययः ३ मदव्याधिः ४ मदः ५ । इति राजनिर्घण्टः ॥ अथ मदात्ययादीनां निदानमाह ।
"विषस्य ये गुणा दृष्टाः सन्निपातप्रकोपनाः ।
त एव मद्ये दृश्यन्ते विषे तु बलवत्तराः ॥
तस्मादविधिपीतेन तथा मात्राधिकेन च ।
युक्तेन चाहितैरन्नैरकाले सेवितेन च ॥
मद्येन खलु जायन्ते मदात्ययमुखा गदाः ॥"
अविधिप्रयुक्तं मद्यं विकारान्तरमप्युत्पादयतीत्याह ।
"निभक्तमेकान्तत एव मद्यं
निषेव्यमाणं मनुजेन नित्यम् ।
उत्पादयेत् कष्टतमान् विकारा-
नुत्पादयेच्चापि शरीरभेदम् ॥
एकान्ततो नैरन्तर्य्येण विकारान् मदात्ययादीन् । शरीरस्य भेदं नाशम् ॥ * ॥ मदात्ययादीनां हेत्वन्तरमप्याह ।